केन्द्रीय विद्यालय संगठन तिनसुकिया संभाग
पूर्व परिषदीय परीक्षा 2025-26
विषय :- संस्कृतम् विषय कोड (सीबीएसई):- 119
कक्षा/ Class:-दसवीं -X

प्रश्न पत्र कोड :- QP10SKT02PB25
निर्धारित समय :- 3 घंटे अधिकतम अंक : 80

सामान्य निर्देश-

1. **कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 8 पृष्ठानि मुद्रितानि सन्ति |**
2. **कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे18 प्रश्ना: सन्ति |**
3. **अस्मिन् प्रश्नपत्रे चत्वार: भागा: सन्ति -**

'क' भाग:	**:**	**अपठितावबोधनम्**	**10 अंका:**
'ख' भाग:	**:**	**रचनात्मककार्यम्**	**15 अंका:**
'ग' भाग:	**:**	**अनुप्रयुक्तव्याकरणम्**	**25 अंका:**
'घ' भाग:	**:**	**पठितावबोधनम्**	**30 अंका:**

4. **प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि**
5. **उत्तर लेखानात् पूर्वं प्रश्नस्य क्रमांक: अवश्यं लेखनीय:**
6. **प्रश्नस्य क्रमांक: प्रश्नपत्रानुसारम् एव लेखनीय:**
7. **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि**
8. **प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठानीया:**

	'क' भाग: **अपठितावबोधनम् (10 अंका:)**	
1.	**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** एकस्मिन् नगरे भिक्षुकद्वयं वसति स्म। तयोः एकः मूक: अन्यः च बधिरः। तौ प्रतिदिनं मार्गस्य पार्श्वे उपविश्य भिक्षाटनं कुरुतः स्म। एकस्मिन् दिने अनेके जनाः तेन मार्गेण सञ्चारं कुर्वन्ति स्म । तेषु बहवः बधिराय भिक्षाम् अयच्छन् । मूक: एतत् असहत् । कुपित: भूत्वा सः तं धनिकम् उक्तवान् "भो महोदय ! तस्मै किमपि मा ददातु । यतः सः बधिरः नास्ति" इति। एतत् श्रुत्वा बधिरः अपि क्रुद्ध: अभवत्। तयोः मध्ये महान् कलहः अभवत् । कलहमग्नौ तौ एतत् विस्मृतवन्तौ यत् ताभ्यां मूकबधिरौ इव अभिनयः कृतः इति । तत्र सम्मिलिता: सर्वे जनाः जानन्ति स्म यत् तौ वास्तविकरूपेण न मूकबधिरौ, अपि तु दृढकायौ युवकौ, किन्तु अलसौ इति । अतः ते सर्वे कोपेन तौ ताडयित्वा ततः प्रेवषतवन्तः।	**10**
	अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) (i) तौ प्रतिदिनं मार्गपार्श्वे उपविश्य किं कुरुत: स्म: ? (ii) तयो: मध्ये महान् क: अभवत् ? (iii) बहव: कस्मै भिक्षाम् अयच्छन् ?	**2X1=2**
	आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) तत्र सम्मिलिता: सर्वे जना: किं जानन्ति स्म ? (ii)कलहमग्नौ तौ किं विस्मृतवन्तौ ? (iii) कुपित: मूक: तं धनिकं किम् उक्तवन्तौ ?	**2X2=4**

	इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत - **ई. यथा निर्देशम् उत्तरत -** (i) **'न मूकबधिरौ, अपितु दृढकायौ'** अस्मिन् वाक्ये **'युवकौ'** इति पदस्य विशेषणपदं किम् ? (क) मूकबधिरौ (ख) अपि (ग) तु (घ) दृढकायौ (ii) **'कुपित: भूत्वा स: तं धनिकं उक्तवान्'** अस्मिन् वाक्ये **'उक्तवान्' इति क्रियापदस्य कर्तृपदं किम् ?** (क) स: (ख) धनिकम् (ग) तं (घ) कुपित: (iii) **'निकटे'** इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ? (क) उपविश्य (ख) अलसौ (ग) क्रुद्ध: (घ) पार्श्वे	**1X1=1** **3X1=3**
	'ख' भागः **रचनात्मकं कार्यम् (15 अंका:)**	
2.	**मित्रं प्रति अधोलिखितं पत्रम् मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत ।** कावेरी छात्रावासात् दिनाङ्कः_____ प्रिय मित्र माधव, (i) _____। अत्र कुशलं तत्रास्तु । अहं (ii) _____ सञ्जायां व्यस्तः आसम् । अतः विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः (iii) _____। अस्माकं विद्यालयस्य छात्राः राजपथे (iv) _____ प्रदर्शनम् अकुवन् । अहं गरबानृत्यस्य (v) _____आसम् । छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनिः (vi) _____गुञ्जितम् अकरोत् । स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि, विचित्रवर्णानि परिदृश्यानि, (vii) _____च दृष्ट्वा अहं गौरवान्वितः अस्मि । (viii) _____बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः । (ix) _____वन्दनीयौ । भवतः (x) _____महेशः । **मंजूषा** गृहीतः, पितरौ, नमस्ते, मम, मित्रम्, राजपथम् लोकनृत्यस्य, लोकनृत्यानि, गणतन्त्रदिवससमारोहस्य, प्रमुखसञ्चालकः ।	**10x1/2 =5**
3.अ	**प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृते लिखत –** 	**5x1=5**

आ	**मञ्जूषा** भारतद्वारम् , सैनिका:, गणतन्त्रदिवस:, पथसंचलनम् , ध्वजोत्तोलनम् , भवति , राष्ट्रियपर्व , अवकाश: , जनसम्मर्द: , सैनिका: **अथवा** **मञ्जूषा प्रदत्त शब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत -** बालक:, पादकन्दुकेन, पुस्तकम्, पठति, द्वौ बालकौ , चित्रफलके, क्रीडत: , बालिका , निर्माणं , चित्रम् , यंत्रेण , पश्यति	
4.	**अ. मञ्जूषाप्रदत्तपदै: रिक्त स्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत –** (सुमित: अमित: च उपवने भ्रमत:) अमित: - सुमित ! चिन्तित: दृश्यसे । सुमित: - आम्। 1. _____। अमित: - किमर्थम् ? सुमित: - गणितपरीक्षायां मया न्यूना: अङ्का: प्राप्ता: । अमित: - तेन किम् ? सुमित: - 2. _____। अमित: - जानामि अहम्। सुमित: - परं मया तु 3. _____। अमित: - तेन किम् ? सुमित: - अग्रे किं करिष्यामि ? अमित: - किं न जानासि केवलं दशमकक्षापर्यन्तम् एव अस्य विषयस्य पठनम् अनिवार्यम् । सुमित: - अमित: तर्हि किमथं त्वं चिन्तामग्न: ? 4. _____। सुमित: - (किञ्चित् न वदति) अमित: - भवान् चित्रकलायां निपुण: अस्ति । सुमित: : - (शिर: प्रचालयति) अमित: - 5. _____। (संवदन्तौ गृहं प्रति गच्छत:) 1. चिन्तितोऽस्मि 2. गणितविषय: तु अनिवार्य-विषयोऽस्ति 3. अस्मिन् विषये सदैव काठिन्यम् अनुभूतम् 4. चित्रकलां गृहीत्वा स्वयोग्यतां प्रदर्शय 5. चित्रकलाया: माहात्म्यं तु प्रतिदिनं वर्धते एव **अथवा** **आ. मञ्जूषाया: सहायतया अधोलिखितं कथां पूरयित्वा पुन: लिखत -** कोलकातानगरे कस्यचिद् धनिकस्य गृहे एक: मूषकपरिवार: प्रच्छन्नरूपेण निवसति स्म। तत्र (1) ..... मषूकदम्पती, चत्वार: पुत्राश्च (2)..... । मूषकपुत्रा: क्रमश: -'धीर:, अधीर:, आशुग:, चञ्चलश्चे' ति नामधेया: आसन्। ते प्रात:काले एव धनिकगृहात् यदा तदा (3)..... गृहीत्वा गच्छन्ति । नगरे इतस्तत: भ्रमित्वा स्वादूनि व्यञ्जनानि च भक्षयित्वा ते रात्रावेव गृहं (4).....। किन्तु, मूषकदम्पती तत्रैव उषित्वा यत्किंचिल्लभते, तदेव (5).....जीवनं सुखेन नयति स्म । एकदा प्रात:काले उत्थाय चत्वार: (6).....नगरं प्रति गन्तुम् उद्यता: अभवन् । तेषां पिता गमनात् पूर्वं तान् उपदिशति - '' पुत्रा: ! युष्माकं ज्येष्ठो भ्राता 'धीर:' यथा कथयिष्यति, तथैव आचरेयु: ''। सर्वे पितु उपदेशवचनम् न श्रुत्वाऽवपि	**5x1=5**

	(7).....इति वदन्तः ततः दूरं धाविताः। अग्रे-अग्रे आशगुः, तदनु (8)..... चञ्चलः, ततः अधीरः, अन्ते च स्थीयताम् स्थीयताम् इति उच्चैः आकारयन् धीरः धावति । तेषु मूषकेषु त्रयस्तु यथारुचि यत्र-कुत्रापि गच्छन्ति। किन्तु, तेषां ज्येष्ठभ्राता धीरः बारम्बारं तान् प्रत्यायति - (9)..... नेदं स्थानं गन्तुं योग्यम्, नेदं स्थानं सुरक्षितमिति । तथापि ते त्रय एव मषूकाः निषिद्धेऽपि स्थाने गमनार्थम् अधिकम् उत्सहन्ते। (10).....द्वादशवादनं सञ्जातम् । चत्वारो मूषका: इतस्ततः व्यर्थं धावित्वा सम्प्रति श्रान्ताः सञ्जाताः। अतः ते एकस्य वृक्षस्य नीचैः आगत्य अतिष्ठन्, अकथयन् च - भ्रातरः ! सम्प्रति अस्माकम् उदरेषु तीव्रम्आन्दोलनं प्रचलति। अतः शीघ्रमेव किमपि खादितव्यम्, अन्यथा मूर्छालाः भविष्यामः। भो : भातर: !, प्रातराशं, चंचल:, प्रत्यावर्तन्ते, 'आम्- आम्', परिवारे, खादित्वा, घटिकायाम् , आसन्, मूषका:	
	'ग' भाग: **अनुप्रयुक्तव्याकरणम् (25 अंका:)**	
5.	**अ. अधोलिखितेषु रेखांकितपदेषु सन्धि संधिच्छेदं वा कुरुत –** (i) अस्माकं <u>सन्निधिं</u> कुर्यात्। (ii) वाक् + मयम्। (iii) दिग्गज:। (iv) भवन्मनोरथ:। **अथवा** **आ. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धि संदिच्छेदं वा कुरुत -** (i) <u>चन्दनरसो</u> न (ii) <u>को</u> भवितुमर्हति (iii) विधात्रा + एव (iv) <u>एकैकपक्षे</u>	**4x1=4**
6.	**अधोलिखितवाक्येषु रेखांकितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत** **(i)** हिमाद्रितुङ्गशृङ्गैः सुशोभिता <u>सूर्योदयभूमिः</u> इयम्। (क) सूर्यस्य भूमिः (ख) सूर्योदयस्य भूमिः (ग) सूर्योदयेन भूमिः (घ) सूर्योदयः भूमिः (ii) वानराणां <u>यूथपः</u> सर्वान्वानरान्अवदत् । (क) यूथस्य पतिः (ख) यूथं पिबति इति (ग) यूथं पाति इति (घ) यूथस्य पः (iii) सर्वेषामपि महत्त्वं विद्यते <u>समयम् अनतिक्रम्य</u> । (क) समयम् यथा (ख) यथासमयम् (ग) समयानुसारम् (घ) यथासमयः (iv) सः <u>सकरुणम्</u> उच्चैः अक्रन्दत् । (क) करुणया सह (ख) सह करुणम् (ग) करुणा सह (घ) सा करुणा	**4x1=4**
7.	**अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति – प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत –** (i) अहं **भाग्यवान्** अस्ति | (क) भाग्य + मान् (ख) भाग्य + मतुप् (ग) भाग्य + टाप् (घ) भाग्य + वान् (ii) सर्वै: जलं **<u>रक्षणीयम्</u>** | (क) रक्ष्+ तव्यत् (ख) रक्ष्+ टाप् (ग) रक्ष्+ अनीयर् (घ) रक्ष्+ तल् (iii) ईटा हि यस्यास्ति **<u>पुर+ङीप्</u>** प्रधाना | (क) पुरा (ख) पुर: (ग) पुरी (घ) पूर्णा (iv) **<u>अवक्रता</u>** यथा चित्ते तथा वाचि भवेत् | (क) अवक्र+टाप् (ख) अवक्र+ तल् (ग) अवक्र+ङीप् (घ) अवक्र +त्व	**4x1=4**

8.	**अ. वाच्यानुसारं मञ्जूषाया: उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत –** आदित्य: - वैभव ! इदानीं त्वया किं क्रियते ? वैभव: - आदित्य ! अधुना तु मया _____क्रियते । का वार्ता ? आदित्य: - नास्ति विशेष: । _____क्रीडितुं बहि: गम्यते, त्वमपि आगच्छ । वैभव: - ना श्व: मम परीक्षा भविष्यति अत: अद्य _____ सम्पूर्णदिने पठामि । आदित्य: - अस्तु, किन्तु त्वं किं पठसि ? वैभव: - गणितविषयस्य परीक्षा भविष्यति अत: मया गणितविषय: पठ्यते । **मञ्जूषा** अस्माभि:, अध्ययनम्, अहम् **अथवा** **आ. वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत** (i) _____(राम) बालिका: पाठ्यन्ते (ii) शिक्षिका बालिकायै पुस्तकं(दा) _____ (iii) बालका: _____ (कथा) श्रूयन्ते	**3x1=3**
9.	**कालबोधकशब्दै: अधोलिखित – दिनचर्या पूरयत –** (i) 10:15 .....अल्पाहारं करोमि | (ii) 12:30 .....भोजनं खादामि | (iii) 4:00 ..... भ्रमणाय गच्छामि |	**3x1=3**
10.	**मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत –** (i) यदि त्वं मां मुक्त्वा यासि ---------- वेलाप्यवेला स्यात्। (iii) यूयम्---------- प्रयासं कुरुत । (iv) मार्गेषु---------- अवकरं न क्षिपेयु:। (v) मोहन: ---------- ग्रामम् गमिष्यति | **अपि श्व: तदा इतस्तत:**	**4x1=4**
11.	**अधोलिखितवाक्येषु रेखांकित – अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत –** (i) **<u>पवनं</u>** वेगेन वहति । (क) पवन (ख) पावनम् (ग) पवन: (घ) पवनेन (ii) अहं आम्रं **<u>खादति</u>** । (क) खादामि (ख) खादतः (ग) खादसि (घ) खादामः (iii) **<u>मोहनः</u>** गृहं तत्रास्ति | (क) मोहनम् (ख) मोहनात् (ग) मोहनस्य (घ) मोहने	**3x1=3**
	'घ' भाग: **पठितावबोधनम् (30 अंका:)**	
12.	**अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** कस्मिन्श्चित् नगरे चन्द्रो नाम भूपति: प्रतिवसति स्म। तस्य पुत्रा: वानरक्रीडारताः वानरयथूं नित्यमेव विविधैः भोज्य पदार्थै: पुष्टि नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत् तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म। मेषस्य सूपकाराणां च कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपति: अचिन्तयत् 'एतेषां कलहो न वानराणां हिताय'। एवं विचार्य स यूथप: सर्वान् कपीन् आहूय रहसि अवदत् - सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति।	**5**

	I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) (i) राजपुत्रा: प्रासादे कैः सह क्रीडन्ति स्म ? (ii) राजगृहे कीदृशं मेषयूथम् आसीत् ? (iii) के पाकशालां प्रविष्टं मेषं ताडयन्ति स्म ?	**2x1/2= 1**
	II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) जिह्वालोलुपतया मेष: अहर्निशं किं करोति स्म ? (ii) सूपकारा: मेषं कै: वस्तुभि: ताडयन्ति स्म ? (iii) मेषस्य सूपकाराणां च कलहम् अवेक्ष्य वानरयूथपति: किम्अचिन्तयत् ?	**2x1=2**
	III. (अ) निर्देशानुसारम् उत्तरत – (i) 'एवं विचार्य .. सर्वान् कपीन् आहूय रहसि अवदत् अत्र 'कपीन्' पदस्य किं विशषेणपदं प्रयक्तुम् ? (ii) गद्यान्शे "राजा" शब्दस्य किं पर्यायपदं प्रयक्तुम् ? **अथवा** **(आ) निर्देशानुसारम् उत्तरत –** (i) **"**अवदत्" इति क्रिया पदस्य कर्ता क: ? (ii) "हिताय" पदस्य विलोम किमस्ति ?	**2x1=2**
13.	अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – **नास्ति विद्यासमं चक्षु: नास्ति सत्यसमं तप: ।** **नास्ति रागसमं दु:ख़ं नास्ति त्यागसमं सखुम्॥** **I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** (i) विद्यासमं किं नास्ति ? (ii) 'दु:खं केन समं नास्ति' ? (iii) सुखं केन समं नास्ति ?' **II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) तपः केन समम् नास्ति ? (ii) केन समं चक्षु: नास्ति ? (iii) त्यागसमं किं नास्ति ? **III (अ) निर्देशानुसारम् उचितम् उत्तरं लिखत -** (i) "नास्ति सत्यसमं तपः" अत्र क्रियापदं किम् ? (ii)' नास्ति त्यागसमं सुखम्' अत्र विशेष्यपदं किम् ? **अथवा** **(आ)) निर्देशानुसारम् उचितम् उत्तरं लिखत-** (i) अस्मिन श्लोके "राग" शब्दस्य विलोम शब्द: क: प्रयुक्त: ? (ii) "नेत्रम्" इति शब्दस्य पर्यायपदम् श्लोके किं प्रयुक्तम् ?	**5** **2x1/2= 1** **2x1=2** **2x1=2**
14.	**अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** ध्रुव: - विचित्रः अयं संसारः। केचन महापुरुषाः महात्मगान्धिवत् अहिंसायाःपाठं पाठयन्ति। अन्ये च आणविक अस्त्राणां निर्माणं विधाय जगतः संहारं कर्तुं इच्छन्ति। सिद्धार्थ:- वस्तुतः विज्ञानस्य सत्प्रयोगः राष्ट्रस्य कल्याणाय, दुरुपयोगश्च विनाशाय भवति। सुश्रुत: - आम्, दुरुपयोगः तु अभिशापः एव। चरक: – विदितम् अस्ति किं युष्माकं यत् प्राचीनकाले अपि आणविक अस्त्राणां मानवेषु प्रयोगः निषिद्ध: आसीत्। ध्रुव: - किं पुरा अपि एतादृशानि अस्त्राणि आसन् येषां मानवेषु प्रयोगः वर्जित: आसीत्। सिद्धार्थ:- किमिदं सत्यम् ? आश्चर्यम्।	**5**

	1. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) (i) विचित्रः कः ? (ii) कस्य सत्प्रयोगः राष्ट्रस्य कल्याणाय ? (iii) पुरा मानवेषु कस्य प्रयोगः वर्जितः आसीत् ? **2. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** (i) आणविक अस्त्राणां निर्माणं विधाय किं कर्तुं इच्छन्ति जनाः ? (ii) विज्ञानस्य प्रयोगः कीदृशः भवति ? (iii) मानवेषु केषां प्रयोगः निषिद्धः आसीत्? **III (अ) निर्देशानुसारम् उचितम् उत्तरं लिखत -** (i)' वर्जितः' इति पदस्य समानार्थं पदम् अनच्छेदे किं प्रयक्तुम् ? (ii) "आणविक अस्त्रं" इत्यत्र विशेष्यपदं किम् ? **अथवा** **(आ)) निर्देशानुसारम् उचितम् उत्तरं लिखत-** (i) "पुरा"अपि एतादृशानि अस्त्राणि आसन्" – अस्मिन् वाक्ये क्रियापदं किमस्ति ? (ii) **"**अहिंसायाः "शब्दस्य विपरितार्थक कः अस्ति?	**2x1/2=1** **2x1=2** **2x1=2**
15.	**रेखांकित पदानि आधृत्य प्रश्न निर्माणम् कुरुत –** (i) **<u>मनः</u>** अतीव चंचलं वर्तते । (ii) मनः असंशयं **<u>तीव्रगामी</u>** वर्तते । (iii) **<u>एतत्</u>** कठिनतया वशीक्रियते । (iv) विषयान् प्रति **<u>आसक्तिं</u>** न करणमेव वैराग्यं वर्तते । (v) घटः क्रमशः **<u>जलबिन्दूनां</u>** निपातेन पूर्यते ।	**5x1=5**
16.	**अ. मञ्जूषातः समुचितपादानि चित्वा अधोलिखित – श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत-** **य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।** **न कुर्यादहितं कर्म स परेभ्यः कदापि च ।।** यः ..... श्रेयः प्रभुतानि ..... च इच्छति, सः ..... अहितम् ..... कदापि न कुर्यात् **मञ्जूषा** परेभ्यः, कर्म, सुखानि, आत्मनः **आ. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –** **भगवन्किमुपादेम् ? गुरुवचनम्, हेयमपि च किम् ? अकार्यम् ।** **को गुरुः ? अधिगततत्त्वः शिष्यहितायोद्यतः सततम् ।।** भगवन् ! ..... किम् ? गुरुवचनम् ..... च हेयम् किम् ? अकार्यम् गुरुः कः ? ..... शिष्यहिताय उद्यतः ..... **मञ्जूषा** तत्परः , त्याज्यम्, ग्राह्यम्, निरन्तरम्	**4x1/2=2**

17.	**अधोलिखितवाक्येषु रेखांकितपदानां प्रसंगानुकूलम् उचितार्थं चित्वा लिखत –** (i) प्रश्नोत्तरमाध्यमेन भवतां **<u>जिज्ञासां</u>** शमयितुम् इच्छामि । (क) गन्तुम् इच्छा (ख) ज्ञातुम् इच्छा (ग) गातुम् इच्छा (घ) कर्तुम् इच्छा (ii) अस्य अवशेषा: तु आर्यकला-संस्कृति-सम्पद: **<u>परिचायिका:</u>** । (क) सूचका: (ख) सेवका: (ग) पर्यटका: (घ) चालका: (iii) **<u>साधु</u>** पृष्टम् । (क) संन्यासी (ख) शुद्धम् (ग) मुनि (घ) सम्यक् (iv) **<u>विपुला</u>** च अत्र वनसम्पदा । (क) पृथ्वी (ख) विशाला (ग) स्थूला (घ) अखिला	**4x1=4**
18.	**मञ्जूषाया: पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित – कथाम् उत्तरपुस्तिकायां लिखत –** स: दुष्टबुद्धि: तु तयो: वार्ता ..... झटिति एव क्षेत्रं गत: । तत्र अश्वत्थमूलं..... तं सुवर्णकलशं प्राप्तवान् । यदा स तस्य आवरणम् अपसारयति तदैव भयंकरम् एकं विषधरं ..... कुर्वन्तं पश्यति । भीत: स ..... पुन: आवृत्य तं च आदाय..... गृहं समागत: । स्वमित्रं सर्पेण ..... इच्छन् स: भित्ती संधिं प्रकल्प्य तन्मध्यत: कलशं गृहाभ्यन्तरे क्षिप्तवान् । विचित्रा खलु दैवगति: । ..... कलशाद् बहि: निर्गत्य ..... तमेव दुष्टबुद्धिं दृष्टवान् । **मंजूषा –** **मृता:, मेष:, वानरा:, बालवाहनयोग्यम्,** **मदोत्थता, वयम्, वानराणाम्, महानासम्**	**8x1/2=4**

****